व्याख्यागम्यमसारञ्च नोत्तरं शस्यते बुधैः ।”
अस्वयस्तपदञ्चापि अनन्वितार्थपदञ्चाप्रमिति व्यवहारतिलके भवदेवभट्टाः ॥ * ॥ मिथ्योत्तरभेदमाहतुः पुनर्व्यासनारदौ ।

“मिथ्यैतन्नाभिजानामि मम तत्र न सन्निधिः ।
अजातश्चास्मि तत्काले इति मिथ्या चतुर्व्विधम् ॥”

मिथ्यैतदिति शब्दतो नाभिजानामीत्यादिकमर्थतोऽपह्नवः । तथा च कात्यायनः ।

“श्रुत्वा भाषार्थमन्यस्तु यदि तं प्रतिषेधति ।
अर्थतः शब्दतो वापि मिथ्या तज्ज्ञेयमुत्तरम् ॥”

त्वं मह्यं धारयसीति प्रतिज्ञायां न गृहीतमिति शब्दतः । कालविशेषगर्भायां तस्यां सत्यां तदा नाहं जात इति अर्थतः । देशकालविशेषगर्भायां तदा तत्र नाहमासं इत्यप्यर्थतः । देशादिमत्यां तच्छून्यायां वा न जानामीत्यर्थत एव योग्यास्मरणेनार्थतस्तदग्रहणप्रतिपादनात् अत्र चरमत्रयं ग्रहणावस्कन्दनमुखेन ग्रहणाभावप्रतिपादकं सापदेशमिथ्योत्तरमात्रं आद्यं मिथ्योत्तरमात्रम् ॥ * ॥ बृहस्पतिः ।

“श्रुत्वाभियोगं प्रत्यर्थी यदि तत् प्रतिपद्यते ।
सा तु संप्रतिपत्तिः स्याच्छास्त्रविद्भिरुदाहृता ॥
अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तं तथा ।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत् ॥
आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जितः पूर्व्वं प्राङ्न्यायस्तु स उच्यते ॥”

अभियुज्यते इत्यभियोगः । प्रतिपद्यतेऽङ्गीकरोति । तं साध्यार्थम् । तथा प्रपद्य सत्यत्वेनाङ्गीकृत्य । कारणं तत्प्रतिकूलरूपं कारणं ब्रूयात् तदा तदुत्तरं प्रत्यवस्कन्दनम् । वाद्युक्तस्य प्रतिकूलत्वेन प्रत्यवस्कन्दनमित्यर्थः । प्रतिपच्यावस्कन्दनात् प्रत्यवस्कन्दनमिति जीमूतवाहनः ॥ तच्च कारणोत्तरं त्रिविधम् । बलवत् तुल्यबलं दुर्ब्बलञ्च । तत्र बलवदुत्तरं यथा । त्वत्तः शतं गृहीतमिति सत्यं किन्तु परिशोधितमिति । अत्र उत्तरवादिन एव क्रियानिर्द्देशः । तथा च नारदः ।

“आधर्य्यं पूर्व्वपक्षस्य यस्मिन्नर्थवशाद्भवेत् ।
विवादे साक्षिणस्तत्र प्रष्टव्या प्रतिवादिनः ॥”

आधर्य्यं दुर्ब्बलत्वं पूर्व्वपक्षस्य । ततश्च स्थापकसाध्यस्य धार्य्यमाणत्वस्य ध्वंसकारणं निर्यातनादि तद्रूपमुत्तरं कारणोत्तरम् । अतएव मिथ्योत्तरादस्य भेदः । तद्धि धार्य्यमाणत्वस्यात्यन्ताभावप्रयोजकमग्रहणरूपं न तु ध्वंसरूपम् ॥ * ॥ तुल्यबलकारणोत्तरं यथा । मदीयेयं भूमिः क्रमागतत्वादिति वाद्युक्ते मदीयेयं भूमिः क्रमागतत्वादिति प्रतिवादिना तथोत्तरमिति तत्र पूर्व्ववादिनः साक्ष्युपन्यासः । तदसामर्थ्ये प्रतिवादिनः । तथा च याज्ञवल्क्यः ।

“साक्षिषूभयतः सत्सु साक्षिणः पूर्व्ववादिनः ।
पूर्व्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ॥”

दुर्ब्बलकारणोत्तरं यथा । ममेयं भूः क्रमागतत्वादिति वाद्युक्ते ममेयं भूर्द्दशवर्षभुज्यमानत्वादिति प्रत्युत्तरं तत्तु धनमात्रप्रयुक्तम् ।

“पश्यतोऽब्रुवतो हानिर्धनस्य दशवार्षिकी ॥”
इति याज्ञवल्क्यीयं वीजम् ।

किन्तु नैतद्युक्तम् ।

“परेण भुज्यमानाया भूमेर्व्विंशतिवार्षिकी ॥”

इति भूमिमात्रविषयकं तत्परार्द्धेनापोदितत्वादिति भवदेवभट्टाः ॥

“पश्यतोऽब्रुवतो हानिर्भूमेर्व्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥”

इति शूलपाणिधृतपाठोऽपि तत्रार्थे प्रमाणम् । ततश्चात्र क्रमागतत्वं पूर्व्ववादिनः प्रमाणोपन्यासः । तथा चोक्तम् ।

“गुरावभिहिते हेतौ प्रतिवादिक्रिया भवेत् ।
दुर्ब्बले वादिनः प्रोक्ता क्रिया तुल्येऽपि वादिनः ॥”

आचारेण व्यवहारेण । अवसन्नो भग्नो । लेखयते भाषामिति शेषः स वादी अस्मिन्नर्थे मया पूर्व्वं पराजितः वाच्यः प्राङ्न्यायो हि धार्य्यमाणत्वसामान्याभावज्ञापकः ॥ * ॥ एतेषां सङ्करे विशेषमाहतुर्व्यासहारीतौ ।

“मिथ्योत्तरं कारणञ्च स्यातामेकत्र चेदुभे ।
सत्यञ्चापि सहानेन तत्र ग्राह्यं किमुत्तरम् ।
मिथ्याकारणयोर्व्वापि ग्राह्यं कारणमुत्तरम् ॥
यत्प्रभूतार्थविषयं यत्र वा स्यात् क्रियाफलम् ।
उत्तरं तत्तु विज्ञेयमसंकीर्णमतोऽन्यथा ॥”

शताभियोगे शतग्रहणं मिथ्या पञ्चाशदेव गृहीतास्ताश्च परिशुद्धा इति मिथ्याकारणांशयोस्तुल्यरूपत्वे कारणोत्तरं ग्राह्यं आदौ विचारणीयं परिशोधनस्यार्व्वाचीनत्वेन स्मरणार्हत्वात् पश्चान्मिथ्योत्तरं तत्र ऋणस्य चिरातीतस्य कष्टप्रतिपाद्यत्वात् । एवञ्च नवत्यभियोगे मिथ्यैतत् षष्टिपुराणा एव मया गृहीतास्तत्रापि त्रिंशत् परिशुद्धास्त्रिंशद्दास्यामि इति मिथ्याकारणसत्यैः सङ्कीर्णोत्तरेऽपि पूर्व्ववत् कारणोत्तरमेव ग्राह्यं मिथ्याकारणयोर्व्वापीति वापिशब्दाभ्यां तथा दर्शितत्वात् सत्योत्तरस्य स्वयंस्वीकृतत्वेन निर्णयानर्हत्वादिति भावः । प्राङ्न्यायेन सह सर्व्वेषैव सङ्करानुपपत्तिरिति तन्नोक्तं यदि शतं मिथ्या पञ्चविंशतिपुराणा गृहीतास्ते च परिशुद्धास्तथा मिथ्यांशस्य प्रचुरार्थविषयस्य विचार उपक्रमणीयः । भूयोऽनुरोधस्याभ्यर्हितत्वात् पश्चात् स्वल्पार्थस्य विचार इति । तुल्यार्थविषयत्वे तु यत्र क्रियायाः साक्ष्यादेः फलं निर्णयः शीघ्रं भवति तदंशस्यैव प्रमाणं ग्राह्यं तथा यदि शतग्रहणे पत्रमस्ति शतापह्नवे च पञ्चाशत्परिशोधने साक्षिणस्तदा मिथ्योत्तर एवादौ तत्खण्डनाय ग्रहणपत्रं ग्राह्यं लिखितस्य साक्षिभ्यो बलवत्त्वेन सम्यङ्निर्णयकारित्वात् पश्चात्परिशोधनं साक्षिणः प्रष्टव्याः । सङ्करोत्तरमप्यसङ्कीर्णमदुष्टं अतो भिन्नमन्यथा सङ्कीर्णदुष्टमित्यर्थः । अत्र चावच्छेदभेदेन मिथ्योत्तरसङ्करे सदुत्तरत्वमेकावच्छेदेन । सङ्करे तु असदुत्तरत्वमाह कात्यायनः ।

“पक्षैकदेशे यत् सत्यमेकदेशे च कारणम् ।
मिथ्या चैवैकदेशे स्यात् सङ्करात्तदनुत्तरम् ॥”

एकदेशे इ[illegible] एकस्मिन्नेव देशे न भिन्नदेशे यथा शतं [illegible]रयाम्येव परिशोधितं न गृहीतं वा इति ॥ * ॥

अथ क्रियापादः ।

उत्तराभिधानानन्तरं याज्ञवल्क्यः ।

“ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधकम् ।”

अर्थी वादी प्रतिवादी च स्वपक्षार्थित्वात् । तयोरधिकारे नियममाह व्यासः ।

“प्राङ्न्याये कारणोक्तौ च प्रत्यर्थी साधयेत् क्रियाम् ।
मिथ्योत्तरे पूर्व्ववादी प्रतिपत्तौ न सा भवेत् ॥”

मिथ्योत्तरे न गृहीतं मयेत्यादिरूपे पूर्व्ववादी भाषावादी साक्ष्यादिकं निर्द्दिशेन्नोत्तरवादी तत्र तस्य मानुष्याः क्रियाया असम्भवादिति न्यायो मतं अत्रापि साक्ष्याद्यभावे उत्तरवादिन एव दिव्यम् ।

“न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत् ।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः ॥”
इति कात्यायनोक्तेः ॥

अत्र पूर्व्वार्द्धेनार्थिनो दिव्यनिषेधेऽर्थात् प्रत्यर्थिनस्तत्प्राप्तौ परार्द्धाभिधानं सिद्धे सत्यारम्भो नियमाय इति न्यायान्नियमार्थं न च व्यासवचने क्रियापदं कारणोत्तरमानुषीदैवीपरमित्येतावदर्थकं मिथ्योत्तरेऽप्यनुयुज्यते इति तत्रापि अर्थिन एव दिव्यमिति वाच्यं श्रूयमाणपदस्य हि पुनरन्वयार्थमेवानुषङ्गः । नन्वर्द्धवैशस्यसहितस्य गौरवात् पूर्व्वोक्तन्यायमूलकविषयत्वञ्च कात्यायनोक्तदिव्यविषयनियमभ[illegible]र्हत्वाच्च यत्र विवादविषये प्रत्यर्थी सन्दिहा[illegible] तस्योत्तरानर्हतया अर्थिन एव इष्टक्रिया तदसम्भवे तस्यैव दिव्यं न तु प्रत्यर्थिनः अधिकारनिश्चयाभावात् अर्थिनस्तत्सत्तात् । न च न कश्चिदभियोक्तारमित्यादिना विरोधस्तस्योत्तरार्हप्रतियोगिविषयत्वात् एतद्विषय एव धनस्वामिनो दिव्यमिति लोकप्रवादः ॥ * ॥ लिखिताद्यभावेनापि दिव्यमाह याज्ञवल्क्यः ।

“प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥” * ॥

अथ दिव्यम् । दिव्यान्याह स एव ।

“तुलाग्न्यापो विषं कोषो दिव्यानीह विशुद्धये ।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥
रुच्या वान्यतरः कुर्य्यादितरो वर्त्तयेच्छिरः ।
विनापि शीर्षकं कुर्य्यात् नृपद्रोहेऽथ पातके ॥”

महाभियोगेषु महापातकादिगुरुतराभियोगेषु । शीर्षकस्थः शीर्षकं प्रधानं व्यवहारस्य चतुर्थपादो जयपराजयलक्षणः तेन दण्डो लक्ष्यते । तत्र तिष्ठति वर्त्तते तदङ्गीकरोतीत्यर्थः । अत्राभि-